# ॥ श्री भद्रकाळी अष्टोत्तर शतनाम स्तोत्रम् ॥

श्रीनन्दिकेश्वर उवाच -

भद्रकाळी कामरूपा महाविद्या यशस्विनी ।
महाश्रया महाभागा दक्षयागविभेदिनी ॥ १ ॥
रुद्रकोपसमुद्भूता भद्रा मुद्रा शिवङ्करी ।
चन्द्रिका चन्द्रवदना रोषताम्राक्षशोभिनी ॥ २ ॥
इन्द्रादिदमनी शान्ता चन्द्रलेखाविभूषिता ।
भक्तार्तिहारिणी मुक्ता चण्डिकानन्ददायिनी ॥ ३ ॥
सौदामिनी सुधामूर्तिः दिव्यालङ्कारभूषिता ।
सुवासिनी सुनासा च त्रिकालज्ञा धुरन्धरा ॥ ४ ॥
सर्वज्ञा सर्वलोकेशी देवयोनिरयोनिजा ।
निर्गुणा निरहङ्कारा लोककल्याणकारिणी ॥ ५ ॥
सर्वलोकप्रिया गौरी सर्वगर्वविमर्दिनी ।
तेजोवती महामाता कोटिसूर्यसमप्रभा ॥ ६ ॥
वीरभद्रकृतानन्दभोगिनी वीरसेविता ।
नारदादिमुनिस्तुत्या नित्या सत्या तपस्विनी ॥ ७ ॥
ज्ञानरूपा कलातीता भक्ताभीष्टफलप्रदा ।
कैलासनिलया शुभ्रा क्षमा श्रीः सर्वमङ्गला ॥ ८ ॥

सिद्धविद्या महाशक्तिः कामिनी पद्मलोचना ।
देवप्रिया दैत्यहन्त्री दक्षगर्वापहारिणी ॥ ९ ॥
शिवशासनकर्त्री च शैवानन्दविधायिनी ।
भवपाशनिहन्त्री च सवनाङ्गसुकारिणी ॥ १० ॥
लम्बोदरी महाकाली भीषणास्या सुरेश्वरी ।
महानिद्रा योगनिद्रा प्रज्ञा वार्ता क्रियावती ॥ ११ ॥
पुत्रपौत्रप्रदा साध्वी सेनायुद्धसुकांक्षिणी ।
इच्छा भगवती माया दुर्गा नीला मनोगतिः ।
खेचरी खड्गिनी चक्रहस्ता शूलविधारिणी ॥ १३ ॥
सुबाणा शक्तिहस्ता च पादसञ्चारिणी परा ।
तपःसिद्धिप्रदा देवी वीरभद्रसहायिनी ॥ १४ ॥
धनधान्यकरी विश्वा मनोमालिन्यहारिणी ।
सुनक्षत्रोद्भवकरी वंशवृद्धिप्रदायिनी ॥ १५ ॥
ब्रह्मादिसुरसंसेव्या शाङ्करी प्रियभाषिणी ।
भूतप्रेतपिशाचादिहारिणी सुमनस्विनी ॥ १६ ॥
पुण्यक्षेत्रकृतावासा प्रत्यक्षपरमेश्वरी ।
एवं नाम्नां भद्रकाल्याः शतमष्टोत्तरं विदुः ॥ १७ ॥
पुण्यं यशो दीर्घमायुः पुत्रपौत्रं धनं बहु ।
ददाति देवी तस्याशु यः पठेत् स्तोत्रमुत्तमम् ॥ १८ ॥

भौमवारे भृगौ चैव पौर्णमास्यां विशेषतः।

प्रातः स्नात्वा नित्यकर्म विधाय च सुभक्तिमान्॥१९॥

वीरभद्रालये भद्रां संपूज्य सुरसेविताम्।

पठेत् स्तोत्रमिदं दिव्यं नाना भोगप्रदं शुभम्॥ २०॥

अभीष्टसिद्धिं प्राप्नोति शीघ्रं विद्वान् परंतप।

अथवा स्वगृहे वीरभद्रपत्नीं समर्चयेत्॥ २१॥

स्तोत्रेणानेन विधिवत् सर्वान् कामानवाप्नुयात्।

रोगा नश्यन्ति तस्याशु योगसिद्धिं च विन्दति॥ २२॥

सनत्कुमारभक्तानामिदं स्तोत्रं प्रबोधय।

रहस्यं सारभूतं च सर्वज्ञः संभविष्यसि॥ २३॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]